श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आञ्जनेयमङ्गळाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आञ्जनेयमङ्गळाष्टकम् ॥

वैशाखे मासि कृष्णायां
    दशम्यां मन्दवासरे।
पूर्वाभाद्रप्रभूताय
    मङ्गळं श्रीहनूमते ॥ **1** ॥

करुणारसपूर्णाय फलापूपप्रियाय च।
माणिक्यहारकण्ठाय मङ्गळं श्रीहनूमते ॥ **2** ॥

सुवर्चलाकळत्राय चतुर्भुजधराय च।
उष्ट्रारूढाय वीराय मङ्गळं श्रीहनूमते ॥ **3** ॥

दिव्यमङ्गळदेहाय पीताम्बरधराय च।
तप्तकाञ्चनवर्णाय मङ्गळं श्रीहनूमते ॥ **4** ॥

भक्तरक्षणशीलाय जानकीशोकहारिणे।
ज्वलत्पावकनेत्राय मङ्गळं श्रीहनूमते ॥ **5** ॥

पम्पातीरविहाराय सौमित्रिप्राणदायिने।
सृष्टिकारणभूताय मङ्गळं श्रीहनूमते ॥ **6** ॥

रम्भावनविहाराय गन्धमादनवासिने।
सर्वलोकैकनाथाय मङ्गळं श्रीहनूमते ॥ **7** ॥

पञ्चाननाय भीमाय कालनेमिहराय च।
कौण्डिन्यगोत्रजाताय मङ्गळं श्रीहनूमते ॥ **8** ॥

केसरीपुत्र दिव्याय सीतान्वेषपराय च।
वानराणां वरिष्ठाय मङ्गळं श्रीहनूमते ॥ 9 ॥

॥ श्री आञ्जनेय मङ्गळाष्टकं समाप्तम् ॥